रया सहायवाणाश्च ताहगारणा कर्म्मणेल्याः॥६९॥ किमयममुष्याविरहेर्नबाहु सामर्थ्यवा
तुल्पस[illegible]हास्त्रापराक्रमोयं क्रमतां वदर्थमेतान्पुनः साधय सिद्धिहेतून्॥७०॥ श्रुत्वेति तत्सम
समदत्त वह्निः सोमक्षितीशादरुणेन लब्धं। रथं सिताश्वं कपिकेतुमस्त्रं गांडीवमप्याक्षय राम

नूणायुगमं ॥७१॥ सुरारये चक्रमरातिरौद्रमाग्नेयमस्त्रं च हुताशनेन ॥ प्रमानवानामपितानवायकौ
मोदकीनामगदाप्रदायि ॥७२॥ नवावद्विक्रमथास्य धन्वविध्वस्तन्यावद्धगोधांगुलित्राणो वीरवरस्त
दान निरर्थीपार्थो रथांगजिथ ॥ तस्माहाप्यसुदुःसहो हुतवहस्तत्र ज्वलन्तु ज्वलज्ज्वालास्तांडवाय
नूसखांडववने विक्रीड कल्पांतवत् ॥७३॥ ॥ इति श्रीजिनदत्तसूरिशिष्यपं० श्रीमदमरचंद्र
विरचिते श्रीबालभारते महाकाव्ये आदिपर्वणि कृष्णार्जुनाखंडलाभो नाम एकादशः सर्गः ॥ ग्रं
था ग्र १२८ ॥ ८० ॥ समुद्रे पराशरसुतः सुतरां भवतांय राशितरणीकृतदीप्रससारभारतमिषेणामु
खे खलु यस्य निर्मलवितानपटः ॥१॥ प्रथसपतिज्ञ इव दग्धुमिदं वनमुग्रधूममुखमुक्तशिखः
॥ चिरकालनिर्दहनकोपवशात्कपिशः किल व्यलसदेष शिखी ॥२॥ प्रबलज्वद्धवडुजिह्वतया
कवलीकृतार्ककचिराजिरिव ॥ प्रतिदुःसहो जनि शिखी महसा सहसन्निव युगांतदवं ॥३॥

सहसा १

बा॰भा॰ ए१ परिपालितस्य जलदेन सदा निजवैरिणा तरुगणस्य तदा । ज्वलितः शिरांसि विदलय्य शिखी
जलदाश्रयं स्वयमिवाधिजधूमसमिषात् ॥४॥ दहनस्तदा स्फुटितवेणुघटाघटितोक्तटध्वनिमिष
९१ णमुहुः विपिनांतरे तनुमतस्त्रसतः प्रतिकोपहुंकृतिमिव व्यतनोत् ॥५॥ समभवत्तदा परमकौ
तिगगनज्वलनाभिषं गपरितापभरतं । वनवासिनां कसकुलः सकलत्रिजगज्ज्वलनप्रलयभीति
मयः ॥६॥ वसनेयग्रहीदथ कुचग्रवयेन तदप्युस्फुरत्प्रदुहशो हहनः तदपि तत्र संतमखिलां गप
रिग्रहणाद निष्पदरणपजनं ॥७॥ ज्वलनत्रसज्ञाननिषेधकरः कनकाभकेतुकपिशीर्षगुरुः
।वरितं वनानि परितः स्फुरितैर्विरराज वज्र इव पार्थरथः ॥८॥ पततां वनान्तरितमुत्पततां पति राम
तं रवेणवपुरेव मुविाणवनेन पार्थशरसार्थहता छदपङ्क्तिस्तु दिवनेव ययौ ॥९॥ अथ यद्ग ए१
राक्षसउरगासुरवग्रसुखैरणपुरुषैः सरुषैः उपशांतये हुतभुजः स्वभुजप्रथितां वपात्रमभि

नःस्फुरितं ॥ १० ॥ प्रहितस्य शांतिजननाय जनैर्ज्वलनेज्जलस्य न लवोप्यपतत् । ऽपतिदूरतो यदु
लतापवशांत्यरिशोषितस्य नभसि स्फुरतः ॥ ११ ॥ मिलितैरतीव वनवासिजनैः प्रहितं पयो वहुदव
वज्वलने । ऽशनांतरालपानकलांकस्य यांवभूवकुमारसुजि ॥ १२ ॥ जलमानयन्नूधरघरीपटलैर्ज्व
लनोपशांतिकृतये किल यन् । स्वतनौ तदाप्युपरितमनरा निदधुर्नीवस्तु निजनाज्ज्वलिते ॥ १३ ॥ ऽप
भितोस्युजानू दहनशांतिधियां चरणानपि व्रतिनाशमतां ॥ ऽपमिदस्य थाजनिरनेकशरत्रसै
रथांगपतनैश्च हरिः ॥ १४ ॥ ऽप्यमिप स्वमेव परिरिद्धा शिखीभवनः स खादहति संप्रतिनः । घृषदश्म
मेतदिवक्कुमगुरुगुरुफालयागागनवर्णमृगाः ॥ १५ ॥ घनहर्षहेषितमृतस्तुरगाः स्वयमेत्य
पेतुरनलेज्ज्वलति । मरणे नियतं भयतो न महस्विनः परिहरंति महः ॥ १६ ॥ दशनैर्विदारयदुरार भ
यः किरिसंचयः किमपि भूवलयं । विपिनं प्रदीपयति तद्दहनेरखनति स्म कूपमिव मूढमतिः ॥ १७ ॥

वनाद् १ नितांत २

बा०मा० ८२

अपवैरमग्निभयजोऽनुगतात्सरयस्तलेषु करिणां शरणां। निहताः पतङ्गिरथैनेरपि तेक्षफलत्यंहो
त्यममिमानमुचं॥१८॥ बिलनिर्गमिसमानायः फणिनोयदधुः स्फुलिंगयुतधूमकलां। निजरामधी
जगदपिक्षलिनं वनसीम्नितेन दहनेन ततः॥१९॥ सरिदंबुचूर्णिनि परिज्वलिनाचलनागवह्निदल
पूरगफलैः कवलीकृतैरिव तदावपिनेरुणाजिह्न एव विललास शिखी॥२०॥ अतिलौल्यतः कवलय
न्मलिनद्युतिकाननं किमपिदावशिखी। बहुमर्दणेन शितिधूममिषात्तनुनेस्म भोजनवहु ज्वर
णां॥२१॥ अवलोकय दावदहनं तमहोपरितापितत्रिभुवनं गहने। अपि पार्थकेन न कपिर्निदधौ स्म
यमङ्गुतं हनपलादपुरः॥२२॥ अपि नापचूकृतिकृतां वदनोह्वसित स्वभावशिखिहेति मिषात्। #
वनरक्षसां दधित गर्भशिखी विशतों तरस्युप गमं शिखिनः॥२३॥ उपरि च्युपत्यपि दधुः स्वशिम्
नम्रमृगयोषितो वगणिनात्मरुजः॥ अथ तासु पानतरलाः सुतरामसहन्त विहंनमृगाः॥२४॥ एम ८२

हंतः १

घ्राणाय क्षुधाविरहिता निचिरं वनवासि लोक मिथुना निनदा। कूजद्धा कतीन्यपि परिक्रमणे सुख निर्व्यथं
पुलकिनान्य मिलन्॥ २५॥ भयसम्भ्रमेपि परिरंभित्त्र थासुखमापनन्दनजुषां मिथुनं क्रियमाणमाणा
मग्निपतनेन यथा नहि जीवितव्यमपि वेदपुरा॥ २६॥ हिमता गुणा दभिमतं मरणा वरमेव वारिणि
नंदीसदवे गलवद्ध वानन निवहान्यपतन्नवनँदन दीषु वनत ः॥ २७॥ दहनो दहे ज्ञ न निहासु तहा द
यिन हहा हृदयना थ हहा॥ हहहा सुगर्भ सहहा भगिनीत्युदितं तदा वनजनेन मिथः॥ २८॥ दवदत्व
मानहरि हस्तिमहोरगासुख्य जीव खकंचुकितः गुरुमूर्धर स्फुरन मूर्निनदो घुसदां ददौ भुवन भंग
भयं॥ २९॥ अथ खांडवप्रसभदाहणधीः ज्ञाणधीरिताष्ट पटलोवलभित्तु।सुशलप्रमाणासरलैः स
लिलैः प्रववर्ष पत्रिभिरिवास्य सुतः॥ ३०॥ अतिदीप्त तद्ववशिखा शिखरैः खलु दह्यमानमिदमब्द ज
लं। ममनेप्यवापवडवाग्निहतो दधिवासदुःखमितिधिग्ग्नियतिं॥ ३१॥ अथ पार्थमार्गणगणो गु

बा॰भा॰ णायनूं जलबारिणीवियतिकुट्टिमतां। अतिवेगसंचरणपत्रभवत्पवनैरजिह्मलदहोज्वलनं॥३१॥ अ
९३ भवत्तदासकुरुवर्षचरीं किल वैरितत्सकोत्रविपने ज्वलतिप्रविवेशमात्रजठरं भयतः पुनरश्वसेन
९३ इति तत्तनयः॥३३॥ सुतरक्षणायकणिराजवधूर्द्रुतमुत्पपादि विदीप्तद्वात्। गिलनावशिष्टफणि
पुच्छसुतं विजयी च कर्त्रचनदीयशिरः॥३४॥ अथ तं तक्षकघ्राणायतः पवनैः परिमोत्थ्यपांडुपृथ्वीश
सुतं। अपमोलिपन्नगवधूजठराद्धरत्तदाहरिरहीड्सुतं॥३५॥ इतिवचनेन कुपितः फणिनीं वि
शिखैवस्त्रिधादि विचकर्त्तनरः दहनो हरिः सचतदाप्यशपन्नुभवनिःप्रतिष्ठइति सर्पसुतं॥३६॥
स्वयमश्वसेनहृद्विकंठनयाकुपितः कृतांतइव पांडुसुतः। अपनिमीषणो विशिखदंडगणौरगरा राम
जं प्यधाहि धुरयन्मरुतः॥३७॥ अथ तं प्रतिघ्नरूपतिरुग्ररुषारुणाद्दृष्टिराजिनिजमंगमधात्॥ ९३
गगनांतरालविकरालदवज्वलनस्फुलिंगभरभिन्नमिव॥३८॥ जलदास्तमात्मनविद्युदुल

यं वृद्धराजिराञ्जितममोचि ततः । हरिणारयेण हरिणाधिपतिप्रतिमल्लपौरुषकिरीटि रुषा ॥ ३९ ॥
त्रुटदुल्करक्रकचडिम्परलैर्दृढगर्जितर्जितदिगंतगजैः । जलदैस्तदैव परितः स्फुरितैर्द्वयकालभीषण
मकारितभः ॥ ४० ॥ घनपद्धतिःपिहिततिग्मरुचिस्तिमिरागिता निवितताननदा । विरराजयेषु शि
खिकीरइववद्धतिदीपितत्रिभुवनोपद्रवः ॥ ४१ ॥ अपतन्नघनाघनघनांबुभरैर्गलहस्तितांडवशि
खाः शिखिनः । सदधोच्छ्रितशत्रुमिषाद्दथदुःखनिःश्वसितमल्परुचिः ॥ ४२ ॥ स्वमथ प्रता
पमिव मूर्तमयं परिभूयमानमवलोक्य द्रवं । पवनास्त्रकुशलो मुशलध्वजधैर्यधामविजयी व्यसृज
त् ॥ ४३ ॥ शिखिसौहृदेन मरुतामभिधावितां रुषा विजयिमंत्रवशीकृत् । उदितो महाबलतया च ततः
पवनश्चतुर्गुणितसंभ्रमतान् ॥ ४४ ॥ प्रहरत्यरोधि युधि मत्तनुजानुज एष पांडुतनुभूरसुना ॥
इति कोपनेन पवनेन किल द्युपतेर्लोडि गृहमडिपतिः ॥ ४५ ॥ सपदि द्विपन्ननुदिशं जलदान्

बा॰भा॰ जयसंपदा सहस्रदृशः॥ ॥ प्रदिदीपदर्हितवनं ज्वलनं नरजेजसासममसौपवनः॥४६॥ निरुग्नेवि
९४ रोधिनिघ्ननेपवनेरुदितास्तनःशिशिवशिखामुदिताः। रुचिबंधुमंबुरुहवंधुमपि ध्रुवमस्पृशन्नदि
विह सनूमहसं॥४७॥ यमंदवारिवारिदनन्निर्विननावियतिस्वयं विजयिनाजयिना। नदतिक्रुधादि
विदधारपविं मघवाभिरुत्य विशदं रदिनं॥४८॥ प्रथसंभ्रममभ्रमितभीमपवौपवनप्रबाणकुपिते धकपतौ॥
त्रिदशैर्मुशं निर्जग्मिजगतिः कुलिना किरीरिकलिकेलिकृते॥४९॥ स्वजनप्रमाथसवदुःखवदनाकुललोक
निश्वसितधूममरैः। धकवसंगसंगिभिरतीवशितिं मदधारदंडमिह दंडधरः॥५०॥ पविपिंड्यदत्तमिव धूर्जटि
नाजगदंतकारिदवहनाद्दिमहः। द्विषदस्खलंस खलुरुद्रसखःसमये हिरण्मममै यगादाम्बमधात्॥५१॥ राम
दनुजेंद्रकीर्तिवरलास्तरलानपदात्पदं ददतियद्भयतः। द्विषदस्खलंसखलुरुजमुरीचकारकरुणाम ९४
रुणाद्धमणिद्धतिः सपदिपाशमपि॥५२॥ इतिशस्त्रविस्त्रजरसाजरसा सहवासवेनदिविषत्परिषत्॥

९५

दववह्निनिह्नवसमर्थरुचिः प्रचचालपार्थसमरार्थमसौ ॥५३॥ अचलन्निजस्वगुरुगर्वभृतः
क्षणमात्रवृष्टिकलिताश्वसिताः युधियद्वराह्वसखगेंद्रफणिप्रमुखारुषा विजयिने विपि
नात् ॥५४॥ युधियल्लराजिरसिराजिकराविकरालतां निदधती परितः स्फुटकोपताम्ररुचि
रप्यचलद्दवहेतिपंक्तिरिवधूमयुजा ॥५५॥ विविधास्त्रधारणकरालनराः क्रमजङ्गमा विरुत
मालभुवः रसनाञ्चलज्वलदुरुज्ज्वलनारजनीचराविदधुरुद्धुरतां ॥५६॥ अतिचण्डनखराः
खगातपवनं छदैः स्तमस्तजनुर्गरुडाः ननु सोपि दीपकलिके वदवः शमनोन्मुखः सपदिय
न कृतः ॥५७॥ मणिपाणिजज्वलदनेकफणाङ्गुलिशालिनस्तरलनादधतः परितः प्रसरत्कृ
रसितच्छतयायुधिमत्पुराजभुजवद्भुजगाः ॥५८॥ दिविदेवतेषु कुपितेषु पुरः फणिदैत्यराक्ष
समनुष्यकुलैः विजयी विभुस्त्रिजगतीसुभटैः कटरि व्यधत्त युधि मस्त्रसखः ॥५९॥ निजरा

बा॰भा॰ ९५

९५

स्त्रपाततरलेषुजदात्रिजन्माङ्कटेषुविकटेषुरुषा।।ज्वयवारिवाहइववासवभूरिषुवृष्टिमष्टसुसदि
क्षुब्धो।।६०।।स्वयमुद्यतेनयुधिकोपिचलन्नूर्ध्वन्लदंक्षिपेण।।गिरिणापलमुग्न।नरवाणपा
तहतवाङ्कतयापततावपानिनिरदाहितनः।।६१।।समितित्रसम्भरजैशरैःशमनःकरलविन
सधिजदंजनया।नरएववीरइतिभूषितवान्नवरेरवयाहृदवनिंमहतां।।६२।।परजीविनछि
दुरकर्त्रनिका।भिधयंत्रलोलरसनायुगलः।युधिकालपाशइवपांडुसुवाविशिषेर्गणैःफ
णाभृतांविभिदे।।६३।।समजङ्घियंभरशमपूर्वचरांनरवाणदोन्यघरिगांधनदः।इतिनस्य
पाणिकृतयापितदागदयारुषेवदिविविछुटितं।।६४।।द्विविजातरूपगिरिगोत्रभृतांशिर
भूभृतामिवसमुत्पततां।सगुरुत्मतांसपदिपद्धतितिंविचकर्त्तयुक्तमयमिंडसुजः।।६५।। राम ९५
प्रचरिष्णुपार्थशरपातभयात्त्रसतःद्रोणेनवरुणास्परणे।करलंविपाशमयमस्त्रमपिव्यवि

तत्कधेववरणास्खलनं ॥ ६६ ॥ कुपितश्चकार कदनानि हरिर्वनवासिनामपि रथांगरयात् ॥
प्रतिजिह्मया तिजरलीकृतया कवलीचकार किल जाननलः ॥ ६७ ॥ द्विषतो निपिष्य युधि वक्रम
हो मुहुरारुरोह मुहुरुच्चैश्चकार । दिवि विंवमंवरमणेः क्षितिमिरात्यभिहत्य पूर्वगिरिशृंगमिव ॥ ६८ ॥
हरिचक्रपार्थशरचक्रहतैर्वनवासिभिस्त्रिदशतां गमिताः । नवरोचमानभुजसौर्यभरैरचलन्पुन
र्युधि मुराः स्महते ॥ ६९ ॥ नरसंगरेणादनुजान्मनुजानपि वीक्ष्य देवपदवीं गमितान् । सह जैरवा
लिकिमु मुक्तिपदस्पृहयालुभिः समरसीम्नि सुरैः ॥ ७० ॥ विललास चक्रधरचक्रमथ धक्रपथे स
हार्जुनसुवर्णशरैः । परितापिनामरकुलं किरणाकुलमर्कविंवमिदमन्यदिव ॥ ७१ ॥ परितश्चदीर्घ
चलितस्खलितप्रतिशस्त्रराशिभिरथोग्रतरैः । नरमार्गणैर्विधुरितायुधि तेययुरिंद्रमेवं शरणं
त्रिदशाः ॥ ७२ ॥ प्रथयविक्रमेणाननयस्पतदामुग्धिनो विशेषवलदर्शनधीः वलसूदनः कृत

बा·भा·
१९६
96

ककोपकण्ठःस्थाणाम समदृष्टिमसृजन्नमसः॥७३॥ शरजालकं किमपि संभ्रमतो विजयी ववर्ष त
दमर्षनिधिः। अपि यत्पतत्रपवनेन शिलाः परमाणुवत्क्वचन चिक्षिपिरे॥७४॥ अथ मेरुशृंगसुत
पार्थमिदमुमुचेरुषेव नमुचेर्द्विषता। दिवि लोहगोलकमिव ज्वलनज्वलितोज्ज्वलंतरलितं त्रिज
गत्॥७५॥ अथ पार्थबाणनिभिः पतिते दवसीम्नि तत्र शितवेरमहति। अपि कल्पशाखिभिर
पूरि नहि स्वमनः प्रकल्पितमपि त्रशनं॥७६॥ कलशात्तुरंगगिरानुभवेरपि दुर्जयो नरहरीक
लयन्। अथ मुक्तसंगरसप्रसरस्त्रिदशैः समं त्रिदिवसीम्नि ययौ॥७७॥ निरपायमग्निरथसंज्व
लितो नरविक्रमस्मरणांकपिशिराः॥ मरुदध्वमूर्ध्नि विललास रणापसृतं विलोकयितुमिंद्रमि
व॥७८॥ जितशक्रयोः सुरजिदर्जुनयोर्ज्वलितः सकांचनमहोदहनः। यशसा नयोर्विशदितो हि
मवानिव यत्पुरोऽद्वशिखी सवर्मौ॥७९॥ इह दावपावकमवानिवमुर्मलिनानि धूमवलयान्य

रम
१९६

मित्तः॥ दिविमूर्ध्नि गतिमभिनिःसृतो नदद्दुर्युश शासिसुरभर्हुर्दिव ॥८०॥ यदुपार्जितं भमुखवैदत्य
जयादि विवासेवनदिमहारियशः॥ इषुभिनरेणादलितस्य कर्णौ रिवतस्मतारकगाणौः कृष्णभ
॥८१॥ मदसिंहनादमपप्लनेदधदुर्नरकोशवौजयसेन तथानुसंगतो किमुरणायमरा
जितिशं किंतं दिविययया विवुधैः॥८२॥ वनजीवनिर्गमनिषेधकृते स्थितयोस्तयोरथ रथस्थितयोः॥
दिविमूर्ध्निमानुषहृनवाहोज्वलिः प्रमदीप्तगर्जचवसा च पपौ ॥८३॥ अपिनीरनामभ्रतिवेरमरं
वतविष्वदोर्बद्वनत्ववनं। दवदंभतोज्वलदुदग्रशिखानि। भतिरद्भमार्यमपिदग्धुमनाः॥८४॥
ज्वलितस्य तस्य दहनस्य भयाद्दहनं विषाकुवलकोमलया। कवमब्रसारिशिशिरांस विधेय
मुनाधुनीतद धुनाप्यसिता ॥८५॥ दवपावकप्रवलतामपहत्य यमुनापि मंक्षु विपिनांतरजः॥
गगनं जगाम परिरब्धुमिव द्युधुनीसखीमसमधूममिषात् ॥८६॥ विपिनप्रभूततनरम्भृजपल

बा·भा·
९७
97

ग्रसनोद्धतस्त्र इव क्लेशपथः क्रूदकूपसिंधुसरसीषु सोदपिवत्पयः स्वयमसेव्यैनकं ॥८७॥ व्य
थितमादाविनतादाहवाशाद्विवसाधिपो पिपिदिवितापभरैः ॥ नलभे न शांतिमधुनापि धुनी
धवमध्यसंविशन निस्सरणैः ॥८८॥ परितापसंकुचदशेषु नसाकुशवक्रितांकृतिरतिग्मरुचिः
॥ स्वभजन्नदामदनवैरिशिरस्तटिनीजटंह्वलतितिनत्रवने ॥८९॥ सदवमत्तदाद्विविजथापरितःप
रितापथ्युपित्रमदितोडुनतेः स्वधुनापि भानुमससहिस्नुतिविह्वववने यथा क्वचन सादिवसे ॥९०॥
त्यमितपवत्वपसिखिमे स्ववशा क्षमगामेकेमेवपवनश्चलितुं ॥ दवतस्ततः किल विक्लष्यजदानि
दधौ सुधारुचिसचिक्रमभूत् ॥९१॥ घनतहूनह्वलननजनधरानलसंगासंगजह्लकृशानुकणा ॥
स्वधुनापि भातिफणिराजफणापरलंघ्वदीप्तमिव रत्नमिषात् ॥९२॥ स्वमुनाह्वया भिनयि
नाशिखिनाहरिरप्यनापि सविधे सनथ्या ॥ जन नांतरेप्पनिशमेव यथा ध्रुवमब्धिनाय शयनाय

राम
९७

सम्भूत॥८३॥ज्वलनोप्यतिज्वलनतःसततंध्रुवमातुरःस्वपरितापभरैः॥प्रविशत्ययोधिमपयःश
मितस्तदगात्तघ्नतीजिमयमोर्द्धइति॥८४॥स्मरणायतःपार्थशरण्यपाहिमांहिमांस्तुहारी॥॥यश
स्विवईय।मयाभयेनेतिवदन्नरुशानुनाच्यमोचिदैत्योनमुचेःसहोदरः॥८५॥प्रागविप्रोमं
दपालस्त्रिदिवमुवमगात्तत्रनिःपुत्रइत्यापा॥यानेवानपायंफलमुरूनपसांवात्पतोब्रह्मचा
री॥ततस्तूवाशार्ङ्गःस्तूपंडुतमुत्तकन्यायशा॥ङ्किकायांमम्मसूतेयत्पुत्राणांवत्तधर्कप्राणतिभिर
मुनामोचिवक्कस्तनस्तत्॥८६॥वङ्किःशार्ङ्गीश्वसेनोरगमयदनुजनृषड्ढिनास्वांडवंतद्द्यो
षड्वासरा॥॥दयकूपितमहाकालमालादिभीमःषड्वक्त्रप्रायमूर्त्तीकुरुकुरुकुरुजनोत
ोमाष्टथ्यवीरोधीरोषड्चक्रिणोपिपृहरुजस्त्रचिरुचिःस्वंपदंप्रापहष्टः॥८७॥भेजश्रीजिनद
त्तसूरिसुरोरर्हन्नूमताईस्थितेःपादाब्जमत्रमरोपमानममणोनामद्विजोऽडःकृती॥तत्र
गु १

वा॰भा॰ ९८

ज्ञात्म निवाल भारत महाकाव्ये मेदं लुप्रियं नियोजितस्मरसैः सुधोर्मिसरसैः स्वर्वादिपर्वादिमं ॥ ९८
॥ सर्गे द्वादशतैरकः सहस्रो नवशत्यपि च । षष्ट्यनुष्टुपां संख्या निश्चिता त्वादिपर्वणि ॥ ॥ ॥
इति श्रीजिनदत्तसूरिशिष्य श्रीमदमरचंद्रविरचिते श्रीबालभारते वीरांके श्री आदिपर्वणि खां
डववनवर्णनो नाम द्वादशमः सर्गः ॥ ॥ ग्रंथाग्रं श्लोकसंख्या ॥ १५१८० ॥ ॥ चंद्रायमाना
सुकृतां बुराशेः सूर्यायिताः साधुहृदंबुजानां । स्फारं त्रिलोकी दुरितांधकारं पाराशरस्यांघ्रि
नखाः क्षिपंतु ॥ १ ॥ पार्थार्ककन्यातनसीम्नि धन्या विद्युत्सु वाजिष्मुसमयासुरस्य । प्रियोक्तयः खां
डवखंडदाहखेदच्छिदे मैत्रजुषो निषेदुः ॥ २ ॥ मयासुरः खांडववह्निमुक्तं जानन्नपुनर्जातमि
वात्मनोषः । पार्थं नतो बाढ बनावतंस समुवाच कंसद्विषतः समक्षं ॥ ३ ॥ भारायदिक्कुंसिंधुरभूध
राणे धाता कवानाशन एष शेषः । विश्वंभरां भूरिभरां विभर्ति परोपकारी पुनरेक एव ॥ ४ ॥

राम ९८

नीरनिधौ

परोँपकारेन रतिं करोति यस्त्वंङ्गराधिकयन्नतां धरित्री। धर्त्तुं मुकुंदोँपि परोपकारी लोकछलाद्दला
तिकोऽरि मर्त्त्यः॥ ५॥ दीप्तेषु संसारदवानलेषु यशः सुधानिलीनः। महानिहामुत्र चनैव ताप
माप्नोति कृत्वापि परोपकारी॥ ६॥ कथं न पक्षी ब्रजतं [redacted] चरंति स्फुरंतितीर्थेषु कथं यथैव। मतां
नितांतं सुकृतानि तानि परोपकार ब्रतमेव दत्ते॥ ७॥ विना दि [redacted] न प्रत्युपकारमूचे स्थिरं वि
रंचोप्य भयप्रदातुः। तलैरहं पार्थनवार्थपूरं संपूरणोरप्यनृणो भवामि॥ ८॥ पितुः कैला [redacted] दो गुरोः
तुरभीतिदातुर्मोक्षस्य किं प्रत्युपकारकर्म। इति स्मरं नोऽह दिकेऽपि खेदं तदंक्रिभक्त्यैव यदि दि
पंति॥ १०॥ वज्रेप्रयोः पार्थनवोऽपि पादपूजां न तेः कामपि कामयिष्ये। इति प्रतिज्ञाय तदात
दग्रेतिरोदधे दानवसूत्रधारः॥ ११॥ किरीटिनः खांडवदाह मित्रं श्री खांडवप्रस्थपुरान्मुरारिं
पैषीद यद्वारवतीपुराय तं पूजयित्वातपसत्तनूजः॥ १२॥ कैलासधात्रीधरमुत्तरेण मेनाक
प्रान्तवान्तुवो २ तः धनेोपकानाः कातिन प्रतीताः। अमीशतांशे दिसमीरवंद्रिभयातर्जं तोवत्रयापतोः॥ कौ॥ तविंवन

बा॰भा॰ ९९ शैलंप्रतियन्प्रतीतंपूर्वोत्तरस्यांदिशिहेमरत्नैरलंकृतंविंदुसरःसरोस्ति॥७३॥न्यासीकृतंतत्र
पुराग्नीयस्त्वरोथगत्वास्वयमानिनायवस्तुत्रयंविस्मयकारिशंखंगदांसभाभांडमयंमयोपि
॥७४॥मूर्छांयदापूरणशब्दपूरैर्दूरेणदेवद्विषदोपियाति।तंफाल्गुनार्यर्थसदेवदत्तमदत्तसखे
वरुणस्यशंखं॥७५॥सभांवजन्याभिधभूमिजानेगदामदान्मारुतनंदनाय।त्वमप्यंतिय
ङ्क्षांतिरवैर्जगंतिकल्पांतशंकार्तसुरासुराणि॥७६॥मयाभिधानांवृषपर्वदैत्यप्रभोःसभां
हस्तसहस्रमात्रं।ददौप्रकृष्टांमृदुनाधिकेनवर्षेणहर्षीसयुधिष्ठिराय॥७७॥विनिर्मि
तायांस्फुटिकाश्मसार्थैःपार्थस्यकीर्त्यामिवमूर्तिमत्यां।यस्यांसहस्राणिवितनुरष्टौ
रत्नाभिरत्नांमयवागवशानि॥७८॥यस्यामहश्चेस्फुरिकस्यवप्रेकल्याणशृंगाकपिशी राम
र्षमाला।व्योमापगायाःपुलिनेनिलीनारथांगराजीवविराजतेस्म॥७९॥यत्पीठवंधस्फु ९९

स्ववर्ण

टिकावनीषु । मयूखलुप्ताः स्म विभांति मत्याः । हंसीकृते पद्मविहारिपद्मा मंजीरवादैरिव केलि
वाप्यः ॥ २० ॥ वैडूर्यपत्राः स्मितपद्मरागपद्मालयो मञ्जुलरत्नमाला । ऽऽसमुक्तमुक्तामयबिंदुवृंदा
वापीषु यस्यां व्यलसन्नलिन्यः ॥ २१ ॥ ऽप्रच्छन्नकृष्णंस्फुरिकेन मित्रिसंभाद्यदृशंखवलनस्य हेतुः
। यस्यां बलंतः प्रतिबिंबितेन पुरो निजे नैव जनाव्यजानन् ॥ २२ ॥ यत्रेंदुकांतग्रथितालवा
लपालीषु तद्वत्त्वमृतप्रणालीः लीलावनीनामवनीरुहेषु वमौ वनीपाल इवामृतांशुः ॥ २३
सूर्याश्म भूमीषु निवेशपंक्तीर्यशोहसद्भिर्नलभूसुजापि । यत्रार्कपाकारसवृत्त्य वशंपाकिं
कापिनाकृष्यत सूपकारैः ॥ २४ ॥ यस्याः शिरःसीम्नि वियद्विचित्रं ननाम णीनां रमणीय
मामिः तारहकूसुधर्म्मादि सभाज येन धात्रा कृतं जैत्रमिवातपत्रं ॥ २५ ॥ धूमायमानाग्नि
निभासुनीलरत्नभासु शोणाश्ममहीषु यत्र । ऽपर्वत्र्प यूनोर्मनसीद्भवत्वान्निकामममेकीकु

बा॰भा॰ १००

100

रुतेस्मकामः ॥२५॥ नीलोपलज्ञोणिषुशोणरत्न[illegible]स्तंभाद्दगंभोजमुदेयदंतः ॥ ज्ञानःसमुद्रो
त्पन्नदंस्तुमालिप्रोढप्रभादंडनिभाःस्फुरंति ॥ २७ ॥ यत्रस्फुरस्फाटिकभूविभूषास्तंभामहा
नीलमयाविरेजुः ॥ स्फारेंदुकांतिप्रकरातिपीतध्वांतव्रजोद्गारभराभिरामाः ॥ २८ ॥ चंद्रातपेय
त्रपपुःसिताभ्रसंदेहलीनालिकुलीकितेषु ॥ क्रीडाचकोराःस्फुटिकास्फुरूपपांचालिकास्य
स्येषुशशिभ्रमेण ॥ २९ ॥ यस्यांदधुःस्वस्तिकपंक्तिलेखा ॥ मुक्तानिमुक्ताफलमंडलानि ॥
चूडालचलत्केतुपटांतनांतपतद्दगंगाजलबिंदुलीलां ॥ ३० ॥ वसन्नूसदात्वं वुकुरार्जुनस्य
मैत्र्येणगंधर्वपरीनपार्श्वः ॥ स्वानेषमाणोचलयेचयस्यांजगौससंकिंपुरुषाप्सरोभिः ॥ ३१
विशारदैर्यैरपिशारदायाःसमान्यमालिस्मितबुद्धिवाधैः ॥ सविस्मयास्तेपिसमौलिकंपंनि
र्वर्णयांवर्णयितुंनशक्ताः ॥ ३२ ॥ नस्यांप्रविश्याथशुभेमुहूर्तेनृपोददौसप्तदिनानिदानं ॥ द्वि

राम १००

[redacted] ज्जावलीषुस्फरिता सुसप्तद्वीपावनीमंडलपावनीषु ॥३३॥ नभोंतरानारदमंगभाभिः
पतंगभासोपि सुजिष्णयंतं । कदाचिदालोकयतिस्मतस्याः स्थितः समायामवनीसुधं जगाः ।
॥३४॥ सनेकतानैः शमहर्षिभिस्तैर्महर्षिभिः सप्तभिरुक्तकित्तैं । पीनास्यशीतांशुरुचंतदाव
विमुद्रचक्षुः कुमुदेव ॥३५॥ पतिव्रताभिर्दिवितारकाभिः शशिभ्रमोछृवललोचनाभिः ॥
स्पलांछनालोकनभग्नकांतशंकाभिरल्पाल्पनिरूपितास्याः ॥३६॥ मैत्रेमदालोकनसावहि
त्याभूवन्निति छन्नतनुघनांते विलोकयंतंकलहायमानान्विमानिनः कानपिमानिनी
भिः ॥३७॥ तदावकांताकुचकोटिकृष्टैः शिरस्तटीकृद्धलितैः करायैः ह्रियाचमक्त्याचनता
ननेन विमानिवर्येणाविनम्यमानं ॥३८॥ उदस्तहस्तेन समुत्सकत्वसंभ्रांभाजांबुजबांधवे तिर
ने । लीलारविंदद्वितयं विहायाविहायासिस्पृष्टपदाब्जयुगमं ॥३९॥ उदंचदुत्तुंगतरंगहस्त [redacted]

[redacted]

बा.भा. १०१

विस्तारवत्यागगनअवंत्या । पवित्रतायै शिव सेव्ययापि दूरादपि क्षालितपादपद्मं ॥४०॥ अथ एवं
तमंतःकरणे न किंचिदनाहतं नाम मुदां निनाद । समीरणाभोगरणाहुणाया निरादरं नाद
रसे महत्याः ॥४१॥ गंगातरंगावलिमंजुलानि सध्यानधामानि जटांतरेषु । उल्लासयंतं शशि
शुभ्रमासं सतीवियोगस्थमिवैकमीशं ॥४२॥ स्फुरत्परीवारमुनींद्रवारनेत्रप्रभाभिः कम
लायितास्यां ध्रुवं पथः श्रांतिभिदं समग्रध्वजां च लैवीजितमुत्तरं तं ॥४३॥ कुलकं ॥ ॥अथाय
ममुत्थितिमाजि मूपकृतानतो व्योमतलावतीर्णः । दृष्ट्वा शिवं भूषितभूरुपीठः पुरो निविष्टमु
निरित्युवाच ॥४४॥ तेजस्विन स्त्वत्कृतु नित्यनत्स्याप्रेत्यप्रियानूदेत्य सुजैरजेयान् । दत्त्वा शिष
स्तप्राधुनैव दैव्यः स्वयं मया स्वर्गगतेन दृष्टाः ॥४५॥ स्वर्गे महेंद्रादि महासभानां निभालने राम
नाजनियः प्रमोदः । तमप्यसौ लुंपति मे तिमात्रप्रभाभिरात्मप्रसभासभाते ॥४६॥ प्रभ्रूतसंभूत १०१

श्रि १

विभूतिजितजंभशोभापराभूतसुराधिनाथं ।। राजन्नृहरिश्चंद्रनरेंद्रमीर्ष्यापरः सुधर्म्मोपरिगं नि
रीक्ष्य ।। ४७ ।। श्रीपांडुभूपस्त्वयि धर्म्मराज सभाविभूषायितवैभवात्मा ।। दिवं समीक्ष्य द्विति
मीयुषो मे मुखेन संदेशमिमं दिदेश ।। ४८ ।। युग्मं ।। सद्धर्म्मकल्पद्रुमपुष्पितद्वदीययशः सुधासिं
धुशतावतारे । जानाति नातिश्रममश्रमेण नीतस्त्वया नीतिपथे जनोयं ।। ४९ ।। महान्नतः
त्रं ५ संननु नाककशंकी धरापातिनिवस्तुनिस्वे । जिह्वत्त्वयाकोपि न तिं नयातिक्रतः पुरद्व्यहनि स्व
दुर्व्यो ।। ५० ।। लीलाचलानां चललोचनानां त्वरत्नरत्नाभरणोरणद्भिः पुरे पुरे वर्त्मनि वर्त्मनि स्या
त्ववानि स्यात्त्ववानि शंकोपि नयप्रघोषः ।। ५१ ।। दृष्टी श दृष्टीव िपाति पांथाम् शं निशीथे
पि महापथेपि हस्तात्स्वयविन्यस्तमणिप्रदीपद्युतिच्युतध्वांतचयाः स्खलंति ।। ५२ ।। त्वद्य
ज्ञत्वप्तामर निर्मयद्रुमानि स्वथासो मरमारसा भूजयया दृ थानंदननंदनोर्धी जहासस्व

बा॰भा॰ त्फुल्लशालिसस्या॥५३॥ उद्धृत्य खलं खेलति पुत्र राज्यमदादे मौयद्यपि नित्यमुर्व्या॥ धार्म्मोधि
१०२ राधीश भवत्यनेनेपिपदेपदे सक्रियते तथापि॥५४॥ भवत्कृते ग्रीतिहृदीपयोधिरत्नाकरे भ्यो र
विणागृहीतैः॥ द्वष्टेर्ज्वलैरेखमणी भवद्भिर्वभूवभूः कुत्रनरत्नगर्भा॥५५॥ वनानि सर्वाणि कारि
घस्र निवसनिसर्वे गिरयः सुवंति॥ त्वयि द्विनिपानिनयैकनिष्ठे विध्यादवीरोहणयोः का
र्यैः॥५६॥ ऊधस्विधेनुस्तननित्यवर्षत्पयोनदी मातृकता वहंतः॥ ग्रामास्तवस्फार फलाभिराम
क्षेत्रानन नेत्राणि घनं द्विपंति॥५७॥ राजन्भवान्राजति नारनी निरंसा वनीति स्तव किंतु देशः ॥म
हामुनीनामपि साम्य रम्यमनोधनानां हरते मनांसि॥५८॥ धर्म्मैकधीरं सकलं विलोक्य कूरेनि
जे कर्म्मणि लज्जमानाः॥ राजन् नंतावकमाधयो वा न व्याधयो वा खलु वाधयंति॥५९॥पदेप रा॰म॰
देसंमदिनासदैवमहेष्ठलोकेनवितन्यमानं नवं नवं भोगमुपाददानास्तवाशिषं त्वग्रिगण॥ १०२

इति ना॰ हिस्यं २४

गृणंति ॥ ९० ॥ जयं भक्तवोक्त्या सफलैव वाणी मुखं भवद्दृश्यञ्जुषां जनानां ॥ तेषां पुनर्वेश्मनि नि
फलैर्वल्लक्ष्मीरभावेन वनीपकस्य ॥ ९१ ॥ क्षिक्षाय दिव्यर्थमनोरथानामश्रैरजश्रैरभिस्त्व
रीणां ॥ तं किं न वांछं नयकल्पशाखी मनोरथं पूरयति प्रजासु ॥ ९२ ॥ वत्पालनादाश्रमे दि
नीषु सुखं यदापुः मुनयो महांतः जानंति नूनं फलनोन्मुखीनां मुक्तेर्मुदामग्र्यगुणां न देव ॥ ९३
मुक्तान्तरं मामिति तावकीने मज्जु धर्म्मसिंधौ धरणीफणीन्द्रः ॥ श्रृणोति कीर्तिं भवतो भुजंगी
गीतिषु मौलीं न धुनाधुनानः ॥ ९४ ॥ भवत्पुरीवासविलासभास्वन्मनोरथा विष्टहृदीसदेव
देवादिवंभो कुमं मीन शक्राः कः स्यात्तु कामं कर्म्म नियोगभंगो ॥ ९५ ॥ एतां पवित्रत्पपुरीं
पुरोस्तु कान्तेरतिः स्वर्ग्यमुपागतस्य ॥ त्रिशंकुसूनोर्जनयन्नभस्त्वयानराजसूयं ततनुषे मखं वेत्त
॥ ९६ ॥ यत्तो जयी राजसु राजसूययज्ञैकयाजी सुकृतैकभाजी ॥ हसन्तपसा वकं विमुखं भू

यनानायणमेकमितरं । अनाधिपोयं गुरुकार्यमाने यन्मन्यते वामधुनीतमेनं ॥ श्रीपांडुसंदिष्टमखायमंत्रं

बा॰भा॰ त्याहरिंहरिखंडमहीमहेंद्र: ॥६७॥ योगयोजयश्रीचतुरैः स्वंत्रर्भिरिवंमोदरैरीहशराजमंसंपतंन
१०३ यज्ञमज्ञजनयत्यमुनमैत्री परोराजबदेवराज: ॥६८॥ संदिष्टमेतत्तव याम्यतोहंदेवशसंदेश
103 कोनमुरारिं । इदं निगद्य्यास्यमुनिस्तिरोभूद्धियोनयनंविद्युदिवांबुमिर्घ्या ॥ ६९ ॥ अथ्याक्ष
यहुर्वहराजसूयमेवाज्ञयुधिष्ठिरेणायमुपांशुरष्ट: ॥ नारायण: संगतराजनीतिपारायणो
सारमिदंजगाद ॥ ७० ॥ सर्वैर्गुणैरर्हसिराजसूयंराजन्नुपुनस्तस्यमहाबलस्य । वधंजरासं
धधराधवस्यविनानाव निर्वाहसंख्यामखोयं ॥ ७१ ॥ भर्गोयंभूमीधवमेधयज्ञंसंकल्प्ययस्मि
न्नुविजसीजयाय । समुद्यतेकेपिनता: पदांतेनेच्छ: परैकेचनकोदिशीका: ॥ ७२ ॥ येयेपुन:
शौर्यवलावलेपात्तस्मसुखाभूपतयोवभूवु: । विजित्यनेनेसमरे निरुद्धा गिरिव्रजान्तःपुडशी ११म
तिसंख्या: ॥ ७४ ॥ राज्ञोधुनांवध्यचैदृशेवशतेननेनेषांमखमीहतेसो । यस्त्वान्नुरुतीमाय १०३
तु

डाजी

यतिष्ठ वर्जैनं नसमग्राड्ढ्सम्भूमौ विभवत्यं वशंपं ॥ ७५ ॥ संग्रामायुद्धेर्विजने यदि स्याज्ज्ञौ यो हरेणा
पिरणां वंजेयः । उपरहं निजेदुर्यशसीवं सिंधौय स्त्वा पितकान्मस्माव सामि ॥ ७६ ॥ भीमो मुजसं
मवलार्जुनश्री र्जैमारिजन्मा जगदेकजेता ॥ अलंमहानीतिरितित्रयो पियुनाजरासंधवधाययया
मः ॥ ७७ ॥ इत्युक्त मंत्रोक्ति सितस्य राज्ञः समाज्ञया शौरिर्ख्यया य । भीमार्जुनाभ्यां सहस्तु रू
सोम्यरम्योपकं गेकेइव पतस्थे ॥ ७८ ॥ क्रमाद्ययुः प्राग्दिशिपर्वसंख्यैर्विहारमुख्यैर्गिरिभिः प
रीतं । त्रयापि वीरा मगधाधिपस्य गिरिव्रजाख्यं नगरं तरीयः ॥ ७९ ॥ निहत्य यस्मिन्नृषभासु
रंङंतच्चर्मसन्नद्ध जद स्फिट कौसो जरासंधनृपेण क्रुधानदंति चैत्यद्रुमपुष्पकीर्णाः ॥ ८० ॥ मुक्त्वा
घ्रंतो लीं स्व भुजप्रहारैर्निपात्यंतं चैत्यकमद्रिशृंगं । अवर्त्मना नत्रयसन्निपातः पुरे हि मातु
र्नृपतेः पपात ॥ ८१ ॥ अमीवलत्वा सितमालिकान्तमाल्यास्ततः कैतववित्रवेषाः । सदस्यपंकस्मा

बा॰भा॰ न्मागधाधिपस्यांययुःप्रवीरांध्वजान्वितेवैराः॥८२॥गिरिव्रजेशौतिथिपूजानेकौरतिर्निषण्णीनगृही
१०४ तपूजान्।ऊचेथनान्विस्मयमानचेताधाराकृतिज्ञानन्नृपाद्दनायान्॥८३॥विप्रस्यतीर्थंकि
105 मुमागधानांसदार्चितंवैन्यकमङ्गिरस्यं।अद्वारमार्गेणपुरंप्रविष्टागृहीतमेसंप्रतिनातिथेयं॥
॥८४॥द्विजानपूर्वंभवतांमुजोर्वीमौर्वीकिणाङ्कैर्णवशंवदश्रीः।राजन्यसौसंननसंचरिष्णुशौर्य
द्विपस्पंदिमदस्नुतेव॥८५॥प्राप्ताद्विजव्याजभृतःविमत्रदात्रस्यकस्यप्रभवाभवंतः।शिष्टःकि
मेङ्गिर्ष्णद्रुहलोयज्वालाकरालेङ्गलनांतराले॥८६॥इत्यत्रधीरोद्भुतवाचिसाविविलोचन
श्रीरुचितस्मितास्यः।तत्कृणीयुग्माक्षनवाक्षनीनमूचेवचःश्रीकृष्णकेलिकारः॥८७॥स्फुटः
क्षत्रियाःपार्थिववाहुवीर्याविशंत्यमार्गेणचवैरिगेहं।केनापिकार्येणगृहानुपेत्यरिपोस्तु एम
रिपोर्नगृह्णंतितथातिथेयं॥८८॥वत्सपूर्वमहूःअवसम्बमूपवधेनधर्मप्रतिकूलमेवाकृतंतु १३४

करिष्यन्मगधेशधर्मरत्नाकराणामसिनः सपत्नंवधाययज्ञेवनिपात्यनिरुद्धंत्वन्मुंचपं
चत्वपथनमागाः युधिष्ठिरादेशवशादुपेताः स्वज्ञातिदुःखं न सहामहेद्य ॥ ९० ॥ अहं सहंता
दनुजावतंसं कंसं हिडंबस्य विडंबनो सौ । अयं पुनः खांडवदाहदक्षो विजृंभिजंभारियशोनि
खंभी ॥ ९१ ॥ राजन्नियुक्तास्त्वयि राजसूयं चिकीर्षता धर्मसुतेन तेन । भवास्य यज्ञे वसुदो सुदो वा
भीमस्य यज्ञे भव भीमवाहो ॥ ९२ ॥ युग्मं ॥ आकर्ण्य कर्णैर्ह्ययवज्ञसूचीमिदं वचः सागरसंगुर
नूः । आस्फालयन्नालबलेन बाहुं हैमाद्वरः कातस्मिंत्रिलोकः ॥ ९३ ॥ रेरे शठ त्वं तिष्ठ न तिष्ठते ग्नि
गिरं किरन्नुत्थितएष यावत । अभ्युत्थितस्तावदमीः समीमो यो द्वंजवादुत्थषितोद्भतागः ॥ ९४ ॥
दोःस्फालनस्फाररवे स्तदेवत योः स्फुरं स्फोटितमंतरिक्षं । खदंडवेषाद खिलेहम्रस्फोटरेस्फो
स्फुरतिस्फुटानततः ॥ ९५ ॥ तदानयोरुद्धतपादपातैः पाताल भर्त्तुः खलु मूर्द्धमिधत्तुः ॥ सह अधामो

बा·भा· लिरभूत्स्वभूतमणिच्छविच्छन्ननिषक्तरक्तां॥९५॥ द्वारेण दूरेण द्रागतवज्रपाणिपाणिस्पृशाद्दिव
१०५ हतिग्रस्तः। मिथस्तयोः कालमहाप्रहारानुस्त्रेह्यमुक्तः प्रविनापि दर्पः॥९७॥ ताहक्कृतलान्ति
105 न्तुरितं गामध्यसंधिर्जरासिंधधराधिनाथः। भीमेन भूमावितिकार्तिकादिचतुर्दशाहः प्रध
नैर्न्यपाति॥९८॥ हृत्तेषु नस्त्रिष्वजिशृस्वपातैर्न भिद्यते स्वः प्रभुचापकोतिः। पायोर्जुनं सर्वरथे
षु यस्य ध्वजोऽजयत्स्तंभ इवेन्द्यनैव॥९९॥ शक्राद्वसुः प्राप यदृह रथो यतस्माज्जरासंधनृपोऽपि
तस्मात्। तं सारथीभूयरथं मुरारिर्भीमार्जुनारूढमथारुरोह॥१००॥ रथध्वजे भूतशतैः प्र
रीतं ध्यानाभ्युपेतं विनिवेश्य ताऽर्ण्य। राज्ये जरासंधनृपस्य पुत्रं विष्णुर्विनीतं सहदेवमाधात्॥१०
१॥ वंदीकृतानृद्धिनिपत्नीन्नृयतान्मि मोच्य तैारेव साद्धर्मथ तेऽघ्र स्वतप्रमोदैः। ईयुस्त्वयीन नुमहः राम
सहजानापाध्मोगजं त्रिजगतीजयिनस्त्वयोमी॥१०२॥ सभ्युद्धृता मगधभूधव सिंधुमग्नाः १०५

कुर्मोवयंकिमितितानवदत्तःक्षितीशानू।कृष्णोभ्यधादितिममेक्षितराजसूयेधर्मोऽङ्गवस्यभ
क्तिजव्यमहोसहायैः॥१०३॥दत्तस्ततोमगधराजजयस्यसारंमूर्त्तैरथोमधुभिदेसयुधिष्ठिरेण
।सन्मान्यतेपिजगतीपतयोविसृष्टाद्देशंजवान्निजनिजंययुरुत्कचित्ताः॥४॥वीरश्रीचतुरान्नि
राज्यवतुरोबंधूनूधनौघैश्चहर्षाद्दंडेननिधायकोशमसमंयज्ञायसज्जीभवाद्दत्वामंत्रमसुयु
धिष्ठिरधराधीशायतस्याज्ञयाविष्णुर्द्वारवतीविलासयुवतीनेत्रेषुमैत्रीमधात्॥५॥ ॥इतिश्री
बालभारतनाम्निमहाकाव्येश्रीसभापर्वणिजरासंधवधोनामप्रथमःसर्गः॥ ॥ग्रंथाग्रं १४७
शुद्धज्ञानसुधांभोधिर्घनंद्वीपायनंस्तुवेयोवर्षद्दिश्वहर्षायश्रीभारतसुधारसैः॥१॥१५॥द्विर्द्वि
चतुरंगचमूचारभारभुग्नावनिर्व्यधात्भीमानुजोथकौबेरीदिग्जयायप्रयाणकं॥२॥स्फारारं
कारहुंकारझंकारिनभासोचलन्नू।अमित्रश्रीसमाकृष्टिमांत्रिकाइवपत्तयः॥३॥सुखराहयहे

बा॰भा॰ षभिः पताकाहस्तशिक्षया रथाः स्वरथिनां कीर्त्तिं निर्जयं तद्द्विषां चलन् ॥४॥ स्वगतिस्पर्द्धिनीं छा
१०६ यामपिच्छादयितुं रुषा पिधानायरवेद्भूतधूलयो स्फुरन् ॥५॥ वलद्वाः कलुषीकर्त्तुं द्विषत्कीर्त्तिपयी
106 रिव । ससृजुर्मदमषीधारावर्षिणः करिणां गणाः ॥६॥ जयश्रीवह्निवीज्यानां राजयोऽलाजमुष्टयः
। जिष्णोर्घनरसासिक्ते दिग्ध्याः पुरपुरंध्रिभिः ॥७॥ कुलिंदविषयप्रान्तावासस्तदनुवासविः स्वपा
रपौरुषो भूरीन् जिगाय जगतीपतीन् ॥८॥ सुमंडलादिभूमीड्सौर्यनिद्रानिशागमः । सप्तद्वीपा
जयी जिष्णुर्योधा ज्योतिषं ततः ॥९॥ शालानितंबभूनागमदस्यन्दकर्दमैः । तत्राति सुरभीचक्रे
क्रमः कृष्णागुरुद्रुमान् ॥१०॥ वृत्तश्चीनैः किरातौघैः सागरानूपवासिभिः । तत्र शक्रसुहृद्राजा भ
गदत्तो युधं व्यधात् ॥११॥ आरूढभगदत्तस्य सुप्रतीकस्य दंतिनः । पृथुः शिलीमुखाः पार्थकरात् सो राम
जत्यजो मदं ॥१२॥ कृत्वा कामं दिनान्यष्टौ कामरूपेश्वरो रणं । धनंजये जयं पूर्वं सनतो व्यतरद्दयैनं ॥१३॥

सार्द्धपर्वतनखर्वबन्धकरद्विपवनरोधसः। कुलूतपुरभूपालं हतं जितवान्युधा॥१४॥ राम
देवसुनामादिराजराजिपजयोज्ज्वली। सेनाविंदुर्दिवःप्रस्थपुरसत्पाभिधं व्यधात्॥१५॥ कृत्वा
प्पपौरवंध्वलगो खंपर्वते श्वरं। जिष्णुरुत्सवसंकेतानूचकेनुसवाकतंनात्॥१६॥ रागिणः स्मे
रकाश्मीरैः स्वथी भूजपतिक्रियया। काश्मीरभूमयः कामतस्थास्तमभजंस्ततः॥१७॥ प्रश्रेस्तेनारि
नारीणां ह्रिरदानामदांबुभिः। तेन मेदूर्मयो यं बृह्सरितस्त्रिगुणीकृताः॥१८॥ प्रवीरीकृतकीं
वीरः। शौर्यमोहितलोहितः। देशमंडलदंडोग्रस्त्रिगर्त्तभरकर्त्तनः॥१९॥ गतोयमितिवैरीभसिं
हः सिंहपुरं युधि चित्रायुधं भूपं तत्रातिश्चायुधं व्यधात्॥२०॥ युग्मं॥ पृथचेलिचलाद्रीणां च दैदरु
यं चलतां क्षिपन्। नव्यवैधव्यसंबंधं कुर्वन्न्वाङ्किकयोषितां॥२१॥ सिंधुकवीर्तिलनः शिष्टभूपा
हूणीदृगंबुभिः। दरदोदरदीर्घोद्धनिःश्वासोऽङ्गमहःशिखी॥२२॥ यो यो कांबोजमोजस्वीरंगच्छु

पु॰ ३

बा॰भा गतुरंगमांलक्ष्मीलिप्सुरसौजिष्णुरुत्तरं गामिवार्यसिवं ॥ २३ ॥ विशेषकं ॥ बद्धाःसिशिचुरुन्हो
१०७ लव्हद्वालीनहिपामदैः ॥ सपकारिष्वपिव्यक्तंमहतामुपकारिता ॥ २४ ॥ कृत्वासुदक्षिणांक्षीणांशौ
107 र्यकांवोजभूपतिं । नृपाइपार्थोजिगायाथप्रागुदीच्यांदिशिस्थितान् ॥ २५ ॥ ऊर्जःपरमकांवोजलो
हड्रोह्मवंभजन् । रिषीकेषुत्हृषीकेशविक्रमःसंक्रमाद्ययौ ॥ २६ ॥ हारितःसहरीनष्टप्राप्यतत्रमु
द्रोकितान् । खेरप्यधिकोरंजितेजःक्रांतजगत्त्रयः ॥ २७ ॥ एनमह्निजयसंजातंयशोज्ञातमिवात्मनः
।ऽपश्यान्तदन्तघषाण्डिंमुप्रमम्पंकषंविभुः ॥ २८ ॥ एषांनास्योचितंगात्रमास्यंगात्रोचितंनवा
इत्यत्रविस्मितास्तस्यतुरगास्ववीक्ष्यकिंनराः ॥ २९ ॥ आसन्नोत्तरदिग्दंतिमदगंधोद्धुरद्रुमैः ॥ कु ३ राम
नीसदेषुरद्वावानंतत्रानहिरदाव्यधुः ॥ ३० ॥ तत्रतइत्थचक्रावसमूढ्दूप्रवहत्यया ॥ सहप्रमु १०७
खतामन्यतदादिघ्फधुनीदधौ ॥ ३१ ॥ तद्वीराःसौर्यसोष्माणोयत्रयत्रेददुःपदं ॥ तत्रतत्राववह

२

तत्रकीर्तिस्तोषं हि मच्छलात् ॥३२॥ चक्रे मूर्जसहग् विंदुवंधुरैः सिंधुरैरधः ॥ सोऽद्रिस्तदीयैर्दाना
लिप्तं निधिकृतकिन्नरैः ॥३३॥ भियाशैलाधिदेवस्य दिग्गजैरप्यलंभितं ॥ तत्करिक्रीडयापीडां से
हिरे देवदारवः ॥३४॥ जित्वा स निष्कुटं शैलं तं क्रांत्वा चत्पर्वतं ॥ देशे किंपुरुषावासे द्रुमपत्यं नतो ज
यत ॥३५॥ स देशे हाटके कीर्तिसुभगं भासुकेऽधमः ॥ प्रसत्य गुह्यकान् जित्वा सरो मानसमासदत्
॥३६॥ तत्र गर्जत्कुंजालोकादस्थानान् भयाच्छितैः यशोभिरर्जुनस्य पवनमः छन्नं सितछदैः ॥३७॥ सु
वर्णसिकताखेलैः स्वर्णपद्मावतंसनैः ॥ वीरास्तत्र वसुर्मूर्तदीप्ततेजोहृता इव ॥३८॥ स्फटिकाद्रौ ज टी
त्रिविवहिगुणायितसैनिकः ॥ त्नोलकापुरीद्वारि स निवासन्यवेशयत् ॥३९॥ तदीषु वर्णसादृश्या
द्दृश्यदशना निह ॥ निजविंबान् वशा बुद्ध्या मुदा तं हंतिनो स्पृशान् ॥४०॥ कर्णनिलोद्भसत्तदान
मषीविंदु निवेशतः ॥ न हि पैरलकाव प्रेतत्त्र शशस्त्रिर लिख्यत ॥४१॥ य छन् घनान्प संख्या निनस्प

बा॰भा॰ १०८ 108 स्वपुरसंगमीः ज्जदाक्षनद इत्याख्याद्धौतथ्यां घनाक्षिपः॥४२॥ जित्वा गांधर्वदेशं स गांधर्वनगरे यही
त्॥ हयांस्तित्रिरकाल्माषानू मंडूकद्वैछिलोऽजवान्॥ ऊनरं हरिवर्षं ते जिगीषुरथ कालनुनः दिव्यैर्नरैः करे
दत्वा बद्धरत्नां निवारितः॥४३॥ स मेरुमुनंदनाभ्यासविलासस्तंभविभ्रमं॥ आरोपय जयस्तंभमिह नि
र्दंभविक्रमः॥४४॥ इत्युत्तरहरिं जैत्रः शंकरेणापि शंकितः॥ उत्ततार स कैलासशैलादैलविलाक्षितः
॥४५॥ इत्युत्तरदिग्जयः॥ बालान्यथ वलीभीमा रम्याद्दूषितैरसौ॥ वेशैरुच्छित्रमांगल्यं दूर्वः
पूर्वादिशो दिशन्॥४६॥ जयलक्ष्मीविलासाद्रिर्वाहिनी वाहयन्नयं॥ भीमाऽचलहृदाश्टंगाग्र
गारः स्पंदनाश्रयः॥४७॥ प्रस्पष्टातः प्रयाणेभूत्पुरः कन्येव पूर्वदिग्॥ मौलौ विजयकल्याण
कुंभवद्विभ्रतीरविं॥४८॥ पुंडरीकैः स डिंडीरस्फुरंगैरुत्तरंगितः॥ भीमानानंदने जोभिर्जग जी
वलसागरः॥४९॥ पूर्वदिग्विजयपूर्वमेव पूर्वादितस्तदा॥ प्रप्रतापीकृतः सैन्यैः स्तूपोद्दूराच्छ

राम १०८

रणभूमिः ॥५०॥ भूभृत्तांकटकामोगवाहिनीं वाहिनीं द्विधा लंघमानोमसदोन्मत्तान् पांचाला
नूर्ध्वापमाकृतिः ॥५१॥ निःश्वपंचानुसप्तपांचालानू गौडकानू दंडदायिनः विदेहानू देहदानू कच्छा
दशार्णेषु ततो विशत् ॥५२॥ निरायुधं युधाजिद्वा सुशर्माणं दशार्णप सन्यधाद्विदिशापुर्यां
यशः स्तंभमिवाकृतं ॥५३॥ निरायुधं युधाजिद्वा यस्मिंस्तत्र ततः सैन्यपद्दषा वेत्रवतीनटं। विषा
रलिषन्वविराद्वा शैलाश्मसु द्विपाः ॥५४॥ एतं सेनापतिं कृत्वा सुशर्माणं ततो जयत्। सोऽश्व
मेधेश्वरं पूर्वदिशाधीशं नरेश्वरो ॥५५॥ सुकुमारसुमित्राख्यौ पुलिंदनगराधिपौ। वशीकृ
त्य निवासांश्च चेदिदिदेशं न्यवेशयत् ॥५६॥ शिशुपालमहीपालघोरद्वेषमगुणोरसो। स्था
लानि तोगजइवतत्र त्रिंशत्त्रिंशाः स्थिताः ॥५७॥ श्रेणिमंतं कुमारेषु कोशलेषु द्वहहूलं। वि
निर्जित्य स तेजस्वी ययावुत्तरकोशलानू ॥५८॥ संयुराभंगुरे रीशेक्ष्सैनीश्रापसंभेदं कालिंदी
र्वृंदातत्र गर्विंतो। ऋलज्ञायदयोध्यासंदीर्घप्रज्ञं नृपाजयनू ॥६०॥ सरयू सरिता तत्र तद्वृत्तिमदमिश्रया। स्वर्धु

बा॰भा॰ १०९ 109 वद्द्वितीयया॥६१॥गोपालकच्छराजादिराजराजीवचंद्रमाः॥नगामोद्यामसंयामरसीव
रा॥सीमसो॥६२॥जिद्वासुमंत्रुनामानमुह्यमानमिलापतिं।कीर्तिः प्रतेनेतेनेहद्वितीयव
द्धवाहिनी॥६३॥सोत्रविश्वेश्वरंनव्याप्रतापयशसीदधौ।तत्कालानत्रवालेंदुप्रमयेवाङ्कुतप्र
मे॥६४॥तेनतेजोग्निभिर्मत्स्यदेशादिदीपितिपंधनः।चिरंदेहविदेहेषुजनकोमिथिलापतिः॥
॥६५॥रूक्षोग्रधन्वनोजायज्ञनकेमिथिलापुरे।रामस्येवाभवत्तस्यकरग्रहमहोत्सवः॥६६॥
स्पर्थेडुपर्वतंसुह्मानप्राव्यसुह्मान्सपत्नकान्।जिगायमागधान्दंडदंडधारोधराधवो
॥६७॥गिरिव्रजेजरासंधसुतंकृत्वाकरप्रदं।सतैरेवहतःसर्वगौडदेशानुपाद्रवत्॥६८॥कं
पयन्भूभृतःसैन्यैःस्वैरावरानुडंगमानपि।ततःप्रापैषगौडेषुचंपांनिष्कंपसंपदां॥६९ राम ११९
तंप्राप्तविषयंवीक्ष्यविषमायुधविग्रहं।स्त्रीलोकइवतंपायाःकंपार्त्तःपार्थिवोभवत्॥७०॥

उत्तालकर्णभूपालावकर्णितरतस्तनः।पौंड्रुंपरणेसेवासुवासुदेवंजिगायसः॥७१॥कृती
कौशकूकच्छादिदेशक्रमितविक्रमः।रंगाद्विजिरंगेषुवंगेषुक्रमतोगमत्॥७२॥तस्यांङ्घ्रिपू
ज्ञानिर्मुक्तमुक्ताटेनमहौजसः।अज्ञासमुद्रसेनेनराज्ञामूर्द्ध्न्यधीयत॥७३॥चंचद्वीवि
केरोत्तिभैस्तस्यनाम्नामणित्र्याजैः।गांभीर्यनिर्जितःपूर्वसागरोपिकरंददौ॥७४॥सगंगासा
गरन्यस्तोजयस्तंभेयशोगजं।स्वयमाकलयमासपूर्वदिक्करिजित्वरं॥७५॥दीप्तस्तस्यप्रता
पाग्निस्तत्रसिंधूर्मिमारुतैः।उद्यात्यनुदिनंयस्यस्फुलिंगाइवमानवः॥७६॥इत्यंशेषां
दिशंजित्वाबलेसौवलांबुधिः।दोर्दंडदंडितोद्दंडमंडलाधिपमंडलः॥७७॥इतिपूर्वदिग्ज
यः॥सहदेवोपिचतुरंचतुरंगचमूवृतः।वीरोदक्षिणदिग्देशजैत्रीयात्रामसूत्रयत्॥७८॥शृं
गातान्नृपात्जयंस्तुगान्गिरिनरिमहीभृतां।प्रशाक्यायणेस्वकेतस्यनिसाणनिश्वनः॥७९

बा.भा. हरिर्वामस्कंधमीडकार्णसंदनकेतुजैः। क्रमाच्चमूरजोनिन्येमरुद्भिःपरमंनभः॥८०॥
११० सूरसेनेषुविद्वेषिशूरसेनांरसेनसः॥ अजयज्ञायदंतीद्रालानगोवर्द्धनाचलः॥८१॥ मथुरा
गरीनाथनारीभिःसज्ञयोहूरः। सवैलंद्वंसहर्षंचहृष्टःसौभाग्यभाग्यभूः॥८२॥ वृंदाव
नाधिदेवस्तत्कुंभिकुंभैस्तदास्मरन्। कंसालेकोछसज्ञोपीपीनवक्षोजविभ्रमान्॥८३॥
तस्यद्वीपप्रदेशःश्यामैःशत्रुस्त्रीसांजनाश्रुभिः। पृथक्कृष्णप्रवाहिभिस्तत्रित्रिश्रोतायमुना
थुम्भूत्॥८४॥ मत्स्यराजाहिराजादिदेशलेशोपदेशकः। चर्म्मण्वतीसरित्तीरभूपभोजाद्व
कुंजरः॥८५॥ अथायमुच्छलेद्धूलिछायासुखकद्दलः। ययावलंतिदेशायवह्निद्वेशीयवि
क्रमः॥८६॥ युग्मं॥ विदानुविंदराजेंद्रयीजयमयीसिंहासंसिद्धापुलिनोत्संगरंगेकीर्तिम राम
नर्त्तयत्॥८७॥ अयमुज्जयिनीवारनारीनेत्रोत्पलार्चितः। तत्रानर्च्चमहाकालंचंचद्धेमा ११०

चकांचुकः॥८८॥ माहिष्मत्यां गतो नीलनृपेण कलयन् कलिं। सव्यधाडुधिरैर्वामपि कोपा
रुणामिव॥८९॥ नीलस्य पूर्वजं पत्रवरवह्नौ गिरं हालतं। साहाय्यायाप्य माडेय धृत नानातः प्र
तापवत्॥९०॥ स्वंतिलोकयानलज्वालामालाभिर्विह्वलं बलं सहदेवः सुचिर्मूर्च्छावाप्त वीदितिहु
ताशनं॥९१॥ समारंभस्वदर्थीयं स्वाहा प्रियनामा स्तुते। सुखं खगमेव देवा नायं यज्ञविघ्नाय
नार्हसि॥९२॥ इत्यादिस्तुतिभिस्तस्य प्रशांते हव्यवाहने। मौलिना नीलः पालयामास श
सनं॥९३॥ त्रैपुरं करदं कृत्वा नस्थरं पौरक्षस्वरं पे। कौशिकान् विवशीकृत्य सुराष्ट्रायां नतो ग
मत्॥९४॥ सुराष्ट्रेशमतो जैषीन्नृपं भोजकटे पुरे। रुक्मिपुत्रयुतं शक्रसुहृदं भीष्मकाभिधं
॥९५॥ मिलित्वाथ परं प्रेम शालिनो वनमालिनः। गत्वा चकार सूर्पारदेशं वशगतं बली॥
॥९६॥ दंडकेषु जयन् भूपान् पूजयन् राघवाश्रमान्। गतो घ्रसागरद्वीपं स निषादविषादकृत्॥ ॥९७॥

छिन्नप्रावरणाननु कुर्वन्नूकर्णप्रावरणान्। द्विषां कालसमः कालसुखान् कालमुखो भ्रमत्
॥८॥ एटामुखी मुखवीरालि जयशालियशस्तुतिः। दीप्तनाम्नाऽक्षयदीपन्नपदीपसमीरणः॥ एर्णी॥
रामकाडिवरैरस्तं भीकारिसेनारजस्वयारणा। धौशरजालेन गृह्णन् भूपंतिमिंगिलं॥१०॥
आयो ध्योष्ठकपादेषु दंडदेषु दयापरः। उत्कट:कर हारा द्विदेशान्तके रहाटकः॥११॥ इडं सुधिष्टि
राज्ञां सराज्ञां मूर्ध्नि किरीटयन्। मलयाद्रितटीप्राप श्रीखंडद्रुममंडनां॥१२॥ पंचभिः कुलकं॥
तत्र वर्हान्तपत्राणि दक्षाके किविशंकिभिः। चंद्रन्नाः पन्नगैर्मुक्तायय युक्तासैन्यसेव्यता॥३॥ तत्र त
स्य भनिर्भयवंदन स्पंदसिंधुषु। जलकेलिं विलेपंच समं चक्रुश्च भूचराः॥४॥ खेलं स्तमालमा
लामुहेलमेलासु संस्पृजन्। तत्र रंगनूलवंगेषु जामसेवत मारुतः॥५॥ तत्राद्भुतभयोद्रेकज्वार
जर्जरविग्रहः। तेनेको दंडपाडिंपनपाग्रः पांडवं प्रति॥६॥ तत्रैभमयग्नस्थत्रत्युत्तव्यक्तमुक्ताद्

रावलिः। प्रशास्तिपद्धिकेवास्यतामत्रपर्णीमूरिहभो॥ ७॥ दुर्दुराचलसिंहस्त्रीगार्भभिन्नदर्दुंहृतिः॥
उपथापेषगिरिंसत्यमसत्यःप्रतिपार्थिवेः॥ ८॥ आर्द्रीकृत्हृतिदानौघैर्मेचकैरुदपत्पकाः॥ रा
मास्त्रतानाडितांभोधिसद्योमुक्ताइवावभुः॥ ९॥ विडौजोनिविडौजोभिर्भर्तुई विडम्बितुं भिषु। परां
चिकांचीनाथस्यचक्रेचक्राणिसक्रमात्॥ १०॥ चोडीनेत्रपुटकोडीकृतौरपिप[illegible]कणेः॥ शां
तस्विन्नांतरे तस्यकोप्यहोकोपपावकः॥ ११॥ नद्दूलैकूणरकुंभिसेवसिःसंभिःसंभिनामसः
।कावेमीविरहारंभसंभोधिक्षं लंभितःक्षणं॥ १२॥ केरलीचिकुरे रक्तकटिलैःकेरलेथसःक्षाणं
बिभ्रानहृदयोविदधेनंविरोधिभिः॥ १३॥ मुदैरलातीरवानीरकुंजसंकेतकेवने। कांताकेरलना
थस्यलक्ष्मीरभिससारता॥ १४॥ उद्देयतत्रपस्वेणवाष्पधौतपदांबुजः। महानदीनदीपक्षैर
नर्चपुरुषोत्तमं॥ १५॥ ततोंध्रेतिसघसघिसभयसस्पसत्ययः। ससगोदावरीतीरमुमुचुर्मार्ग

पाकश्मासरः

बा०भा० जं रजः ॥१६॥ नीरंध्रयन् दिवारं ध्वमंध्र भूपजयोद्भवैः यशोभिः स्तोत्रभावेनानमद्भीमेश्वरप्र
३३२ भुं ॥१७॥ ततः कुंतलकर्णाटभूपाभ्यां भीमविक्रमः शासनं ग्राहयामास सैन्यशासनः ॥१८॥ हसन्
सैन्यान्तभुमुग्रभुजगेशभुजेन सः। स्फूर्जज्ज्वलत्स्फुलिंगेभ्यः कलिंगेभ्यस्ततोऽचलत् ॥१९॥ नि
श्वाननिविडध्वानभस्मानुगतिच्छलात्। कलिंगेषु महेंद्रादिस्तंबं गावज्जितोऽनमत् ॥२०॥ तस्मि
न्नाराचरोधाराभिः कलिंगेशः सुरेशवत्। चिरं ववर्ष विस्तार्य गर्जनोद्धर्दिवारिदान् ॥२१॥ कर
वालेन कुंभेभ्यः कृष्टा मुक्ताफलान्यथ। वीजानीव रमालाभिर्विक्षिपत् ॥२३॥ पदपद्मद्वयं तस्य
लक्ष्मीसद्मस्वयं ततः। सुकाकलिंककलिंगेशस्ततः केशरमार्जयत् ॥२४॥ तत्र नीरधितीरामपू
गाभोगिलतादलैः। तद्वीरैः कंचिदस्मारि नारिकेलीफलेक्षणात् ॥२५॥ जित्वा रोमांचकव राम
चकुकक्ष्वादिभूपतीन्। द्विद्वीपे सिंहलद्वीपे समहाभिर्महावलः ॥२६॥ तत्र द्विपरदोत्पातकं ३३२

यशो नद्योक्सवान्भुवि पांडवः ॥२२॥ धाराद्वयाग्रभिन्नेभकुंभसुक्तावलिच्छलात्। जयश्रीस्तत्कृपाणस्य व४

पमानमहावपुः। तस्मैमभियेव भूरीणि ददौ रत्नानि रोहणः॥२७॥ द्विरदोदस्तकर्पूरतरुगीर्णा
भिराहतं। तत्र कर्पूरपारीभिस्तत्कीर्तिभिरिवांवरं॥२८॥ श्रीवेहणाश्रमागस्त्यसेवार्थी तत्र संस्थि
तः। सिंहलेशात्प्रियं वृत्तः प्रभृषीहं कांप्रतिग्रहो कचं॥२९॥ श्रीरामविक्रमचमत्कारविस्मारणोरणैः
।स्पद्धो भितांसरद्धोभिर्वशी चक्रे विभीषणं॥३०॥ युधिष्ठिरजयस्तंभसमारोपविशारदैः॥ त्रि
कूटमपि शैलेंद्रं चतुःकूटमविधान्॥३१॥ लंकाकस्कंदकल्याणेक्ताडिंबंतो तुदाइव मेशोऽवर्ष
न् सुवेलाद्रेनच मूलैर्जनीचराः॥३२॥ इत्थं जयजुषा तेन समेतेन समन्वितः। ववले कलयन्
कीर्तिमर्जुनामर्जुनानुजः॥३३॥ इति दक्षिणदिग्जयः॥ ॥नकुलस्तु महीपालकुलस्तुतप
राक्रमः। प्रपेदे यं स्वभूबीचीं प्रतीचीमभिवेलिवान्॥३४॥ परिमृष्टयशःपुष्पा मरुतेव प्रसर्पता।
कंपयांचक्रिरे तेन केन भूपतिभूरुहः॥३५॥ स्पंधानां सैन्यधूलीभिर्बधिराणां च भेरिभिः। निः

बा०भा० शंकं द्विषतां लक्ष्मीरसादभिससारतां ॥३६॥ विपक्षिपक्ष्मलाक्षीणां क्षीणां कुर्वन्मनोरतिं ॥
११३ श्रीकार्त्तिकेयभुवनं रोहीतकमुपाड्व्रजत् ॥३७॥ दिगन्तरामयशो रोही रोहीतकपुरस्पृशां ॥ म्लेच्छा
113 णां ड्रावयन्मत्तमयूराणां रणोत्सवं ॥३८॥ चमूभरनमद्भूमिर्द्रोणनतकुलाचलः ॥ महाद्रावरु
तावेशं मरुदेशं विवेश सः ॥३९॥ युग्मं ॥ वशिष्ठाश्रमजैर्वह्नैरर्बुदाद्रेः सदाफलैः ॥ तत्सैन्या सा
पममुचन्बहिरन्तश्च मार्गजं ॥४०॥ सवक्षिश्रमखेदानां विश्वामित्रजितामपि ॥ तत्र धात्रीभृतामस
न्येत नु द्विषपेयशः ॥४१॥ तस्य सैन्येभदानार्द्रहतवीरास्त्रपंकिले ॥ द्विषल्लां जाश्च भिर्न्नघोज्जा
गले पिष्ठे लेवहन् ॥४२॥ शैरीषकान् शिवीन्हैमांस्त्रिगर्त्तान्नष्टमालकान् ॥ पंचकर्वटकान्
मध्यवाटधानान् द्विजान् जयन् ॥४३॥ [illegible] पिग्रीष्मज्वलद्दावपावकोग्रमहः सहः ॥ पुष्करा राम
रण्यलोकोऽर्थघ्नतापे स्वेन तापितः ॥४४॥ युग्मं ॥ तद्रूलांभो निधेर्लोकलंघनाय प्रसर्प्पितः ॥ ११३

स्था

मेजं भो निधिरिवायेमर्यादावह्निवैभवं ॥४५॥ दृहताकुलभूपालानुक्रांतस्तेजसार्णवः ॥ मेघे
ग्निमौर्वं सर्वांगव्यापिनं स्वजयोछ्रितं ॥४६॥ तत्र नालासवोन्मत्ता स्खलन्तीति बलत्वमात् । वीराविं
वित सैन्यासु सागरोर्मिषु धाविताः ॥४७॥ पृथेषमत्तदंतीव भूरुहानिव भूभुजः । सरस्वती
सरिकूलवद्दृढमूलानव्यमूलयन् ॥४८॥ गर्वोपार्द्र मतिकेषु खर्वमकृत प्रापंचयत्पूचनास्तूवां
पंचवनशितुर्व्यंजयनद्वारगुत्तरंछ्वातषन् ॥ दर्प्पोणामरपूर्प्परं क्षितिपतिं विश्लेषयन्निर्ममे खेदं चे
कटाक्षिपस्यरसवान्निद्दीव्वासामासस ॥४९॥ दोर्भारामहारहूणान्नृपतेर्भंक्ताप्रभासाभिध
क्षेत्रालंकृतितीर्थसार्थेन मनेः कृत्वाकृतार्थं वपुः । देवं द्वारवतीपतिं प्रियवचस्तोमात्रेतं शासं
मद्दूनरेंद्रमाईमनसो सद्धर्मभिर्निर्ममे ॥५०॥ म्लेछानुच्छिद्य कृत्स्नानमरगिरिचरानूपड्डवेंद्राय
दत्त्वादारिद्र्यवैरशापशमनशमनः पूर्णदिग्जैत्रयात्रः । प्रथेतस्यांघ्रतीच्यामयमुदयगिरिः

११५

स्वीयतेजोयशःश्रीभानुप्रालेयमासोरजनयतयशःस्तंममंभोधितीरो॥५३॥ ॥इतिश्रीपश्चिमदि
ग्जयः॥ ॥मध्येचं धुप्रष्ठितविजयस्तंभवेदीचतुष्कंदीप्तैतेजःशिखिनिविधिनावर्द्धयन्मंडलानि
।यज्ञश्रेसुःप्रस्तमरयशश्चंदनस्यांदस्तुभ्यामिद्धंद्दष्टीसुकृतततनयःपर्यणैषीन्मनीषी॥५४॥अ
थामीसामीरिष्टुपतिसुजनासत्यजनजाजगार्जिताःपत्ताःसुकृतसुजमानम्यमुदितं।नगर्याः
पर्यंतक्षितिषुनिखिलाशाजयमयश्रियांलीलाशैलानिवकनककूटानघटयन्॥५५॥अथ
ष्टापरनरपतिश्रेणिस्रुत्मातपत्रैर्हैमंजगतिसकलेलालयन्नेकमेवनाराभारब्धपरामभवभैभवोभानु
विंबभ्राजीभूमींदिवसइवसद्योजयामासवीरः॥५६॥इतिश्रीजिनदत्तसूरिशिष्यपं॰श्रीमदमरचंद्रवि
रचितेश्रीबालभारतेसभापर्वणिसर्वदिग्विजयोनामद्वितीयःसर्गः॥ग्रंथाग्र१६१॥ॐ॥अथसुवस्तुषु राम
परासरात्मजज्ञानदुग्धजलधिःसमुद्धृप्येनीयतेवतयदेकबिंदुनाभारतेनविलंयंभवानलः।सोदरैरथह १०४

पत्री

कोदराद्रिभिस्तैरधिष्ठितजयो युधिष्ठिरः। आदधौ वशमदिक्चतुष्टयस्तुष्टये मखवसुज्ञां मखोद्यमं ॥२॥
एष एव समयः समुन्नति यावदापततितावदापततं। श्रीपुराणपुरुषः पुरः पुरीमर्तुरस्य चतुरः क्र
तुक्रमे ॥३॥ स्फाटिके सदसि संनिवेश्य तं क्षीरनीरधिनिवेशविस्मरं। विश्वपूज्यमभिपूज्य मक्ति
चावदत्सुगदः क्रतुं कृतांजलिः ॥४॥ त्वत्प्रसादमदसीमया मयानिर्जितं जगदजेयमप्यदः। तामसंस्तु
उति दिव्य भंगुरं पंगुरप्यरुणसेवयारुणः ॥५॥ तत्क्षणं कलुषितात्मनारणेऽस्मत्ततामपहृताः प्रमा
द्य। [illegible] तिकांतिसमदामदालयेरुक्मिणीवरनरुक्मपर्वताः ॥६॥ ध्यातया जगदिनत्वदाज्ञया
स्तं भितामणिकदंबदंभतः। आजगाम ममधाम मामनिनां नाम धामदहनो महीमुजां ॥७॥
यैर्विलासगिरिभिर्जयश्रियां जिग्यिरे बकिनदिग्गजा दिशः। तान्ममव्यदधतद्गामास्तः प्रामृ
तं स्मरशामसंनिभानिभानू ॥८॥ येश्ववार मनसा समं समः स्फत्व संतिसमरे समं गतः। युक्रमे

वमयितानूददुर्न्नृपाश्चिन्नसेवितमदंद्वयोदयान्॥९॥ इत्यमीवैंममपरोपकारिता भासुरा
शयविभूतिराशयः॥ त्वत्प्रसादवशतः परः शतद्क्ष्मा भुजंगराजययोनयो भवन्॥१०॥ तद्धि शात्रिदश
शर्म्मकर्म्मणाग्यकरोमिसमयज्ञसोंपधति। त्वं सुमित्रमसिमे सुमंत्रिते सद्गुरुः सदुपदेशसंसदि॥११॥
संति संततमपि त्वदीदृशा॥ राजसूयमखराजयोपि मे किंतु नातनववचनादिह स्पृहा सापि त्वद
नुबंधबांधवा॥१२॥ मंत्स्तु मामनुमनुष्यतः कुतो गच्छ मेद्भुतमहाः सहायतां। दीक्षितो भवतु वा भ
वान् भवद्वारतीभरपरो भवाम्यहं॥१३॥ इत्युदीरितवति प्रभौ भुवः सत्यमभ्यषित विष्टपाधि
पः। लोकहृत्कुमुदवृंदसंमदद्योतमानदशनेंदुमंडलः॥१४॥ त्वं कृतं कृतकृतिन् भवत्कृते मत्कृतो
पि त्वनाकिंचिदंतरं एकमेव हि यशो द्वयोर्धने भात्यहर्पतिमहः समूहयोः॥१५॥ दिग्जितस्त्वद
नुजास्त्वदुत्सवे निर्विशेषमतिरेषस्यते ह्यहं॥ इत्यमीददनुपंचपंनतांतेस्पयस्त्वयिनकर्म्मकृन्नृपः

॥१६॥ एवमुक्त्वा बतिदेवकीसुते सेवकीकृतसमस्तराजकाः। सैष धौम्यमुनिनामुनीन्नृपः सो
दरैरपि नृपानजूहवत्॥१७॥ सिद्धसिंधुसुतमुख्यवं भूमिदेवधौरैरनुमतोनुबंधतः। सैष धौम्य
मुनिनामुनीन्नृपः सोदरैरपि नृपानजूहवत् सोमभूर्तिरमयमष्टमूर्त्तिभृत्तमूर्त्तितामधिक्षितदीक्षितो
नृपः॥१८॥ धौम्यदिष्टनकुलाग्रजद्विजस्तोमसंस्तुतसमस्तवस्तुनि। यज्ञकर्मणि पृथात्मजो
यथोचित्यमादिशद् यथावनीधवात्॥१९॥ सद्म नेष्टकृतभोजनक्रियाशोधनान्यवसुयोध
नानुजः। भूमिदेवजननतिप्रतिग्रहे साग्रहो जनि कृपीतसंभवः॥२०॥ पूजना निजनयत्नयाद्व
लोराजराजिषु राजसंजयः॥ कृत्यवस्तुनि मनो धुनीजनि द्रोणयोरजनि याज्ञिके धिक्कृत
॥२३॥ दक्षिणास्वजनि दक्षिणः कृपः तत्व मैत्रि विदुरेण धार्मिकं। अर्हणाग्रहणगौरवं नृपः
कौरवो भजत सर्वभूभुजां॥२४॥ नारदादिमुनिराजराजिते केशवादिकनरेशपेशले। ब्रह्म

बा॰भा॰
१३६
११८

तामधित्ततत्र सत्यवत्यं राजन्त्विजगदर्चितः क्रतौ ॥ २३ ॥ यज्ञवेदि मनुसंस्कृतामुपाध्यायपं
क्तिभिरथोयथोचितं । आजगामसहराजकैरसौ राजसूययजमानशंकरः ॥ २४ ॥ साजगत्त्र
यजनौघपावनी नूनमात्मनि पवित्रताकृते । तत्पदं त्रिपथगाभ्यगादनूवानचक्रगुणानत्र
यीमयी ॥ २५ ॥ भावसौरभभृतो विभावसौ मंत्रपूतमुपहूतदेवताः जुह्वतिस्मवतवह्निपिह्नि
जाइव्यमंडलमखंडशक्तयः ॥ २६ ॥ भावसौरभभृतो विभोवसौ मंत्रपूतमुपहूतदेवताः जु
ह्वतिस्मवतवह्निपालनोद्यततृतीयपांडवप्रवरखांडवरासो धनीकृतापावकेनपपिरेपरंपुराः
सर्प्पिषामिहवपुः प्रपुष्टये ॥ २७ ॥ हूयमानमुपहूयसज्जिताविह्वपहव्यममराहविर्मुतिः
पानतोद्रुममतृंतमुहुर्मुहुः सावहित्थमहतस्पृहाः पपुः ॥ २८ ॥ उद्गतोपिसततिधूमसंचयेलो राम
चनैरनिमिषैर्निरीक्षितं गृह्णतस्महविराहृतं द्रुतं पावकेनिपतदेवदेवताः ॥ २९ ॥ नीरसामि ११८

रम्लत्या मृतच्छन्नतोः किंच नीरुचिभिरभ्रतोधरो तत्र कञ्चनसुधाचयस्त्वयया त्रिंशता त्रिदशप्राकारि
भिः पपा ॥३०॥ तत्र वल्लभनरस्ताथवल्लाता संततं च्छपतिना वियोगिनी । द्यौरराजत मखाग्निकेत
नश्रेणिदंभकृतवेणिवंधना ॥३१॥ दानवारिधुतदानवैर्यथा स्वादिजैव विबुधैः सुखं सुधा
स्यधूतलभुजातिभिस्तथा भुज्यता न्नममृतं द्विजातिभिः ॥३३॥ संभ्रमनरेवभ्रथेकमंगवैः संगत
स्त्रिजगतः प्रियंकरः । बंधुवंधुरितसंनिधिर्व्यधाद्दानवर्त्मनि मनोजनाधिपः ॥३४॥ स्पष्टतामस
रत्नरत्नसंडलंदानहेतुवसुधाप्रवर्द्धनं । इत्यपर्यद्विजकरेषु कल्पनावारिवारिनिधिशोषकं ददौ
॥३५॥ तत्र दानरसिके रसापतौ स्वापतय मरभाजि केवयं । इत्यभावि सुविकल्पणाद्यैरसुदा
नजलसेकानोपिन ॥३६॥ भूमिदेवनकुलाय भूमिकादानुमेवद्धनो निजे भुजे । कुद्धभूरि
तरभूमयष्टणा कुर्वते स्म हृदि तस्य भूधराः ॥३७॥ भूमिदेवनिवहाय भूरिभिर्भूरिदायिवसुभिः

पावकैकमुखहुः स्वेनोनतात्प्रिनाविनियतं नदैवतैः । तत्र तेन सवतीनसामृतं पानुमिथ्यजातिद्वानिदैवतैः ॥६

न कारकैर्व्रतः॥४३॥ अर्थिनः प्रथितकार्यसंमितं ग्रक्तोप्याधिकमस्पयच्छत॥ नाददे स्वल्पुं ददामि खल्व २७

बा॰भा॰ सहामुना॥३७॥ सो वसुमतीति नूतनं नाम नूनमतनिष्ट विष्टपे॥३८॥ राजकामिमरवेशरवया
११७ मुवास्वस्पयाप्ययमपूज्यद्ययाना नितांननु नितांतमारिणीमोलिभिर्द्रुतमगृन्हतानते॥३९॥
स्पादितो यदसुवृक्षतं वसुस्माधवैकदुपदाक्षतं मुदा स्पाददे स वहुमानतः कृतीमार्गणेषु रणो वह
दोषुनः॥४०॥ पूर्यतामुपदयाममकतुःस्पर्द्धयेतियददुर्द्धनं नृपाः॥ तद्धभूव खलु जस्य भूपतेरक
मार्गणाकदानवर्णिका॥४१॥ दातुमिष्टमजानिष्टतस्पयत्न द्यचिंतिमनसापिनार्थिभिः॥ चिंतितंन
रसनास्वधारितैः किंतु दानमजनित्रयाधिकं॥४२॥ याचकोयदिहयावतेप्सितांनजवादितिजगा
दकिंकरानू। दानकंकनकमानयत्पसोनादिशास्वलुर्द्वादएषमुविकेनमज्यतां॥४४॥ इक्ष्व
देशमणिपूर्व पेपयोनाथमाथहृदयस्तदा हरिः॥ मंदरभ्रमिसरवविलेक्षिपद्यदिरोचनसुतंस्तु राम
शोचनत॥४५॥ कंपभ्रहृदमणिर्निमोमणिस्तापवाकलुषहृन्निशामणिः॥ स्वस्वदानचकिताः ११७

लु॰का॰

सुचाभूवंस्तत्र येषु तिनवच्छवीनमणीन् ॥४६॥ पात्रमेषवसुभिर्यथोत्तमं रागभङ्गिरपिपूरयन्नक्रमा-
त् ॥ सर्वतोप्यवनिमप्यपूरयत् प्रातरम्भकदयवा निवार्यमा ॥४७॥ स्वपयन् दृथुयथादरिद्र क-
वित्तामषनिखिलेपि भूतले । एकरूप्यमस्त्र जद्युथायथा निम्नमंवुघरयन् वघनं घनः ॥४८॥ अ-
युगांतकुलभङ्गिरद्वयैरर्थिनां निधिगणैरदर्पितैः रत्नराशिभिरनंतयारजोगर्भयाप्यजनिर-
त्नगर्भया ॥४९॥ स्वतथादितसपार्थिवोयथा संजगुर्दिवि विलेचयाचकाः स्वर्युधिष्ठिरमम र्त्यपा-
दपंपन्नगास्तैलय युधिष्ठिरं बलिं ॥५०॥ भूमिपातुरथपात्रमत्रतत्संसदि प्रथममर्हणोचितं । पृच्छ-
तः क्रतुमहे पितामहः संभ्रमादिति वभार भारती ॥५१॥ शक्रचक्रनुतमर्हणोचितं यदिदन्नपि ज-
गज्जुरुं हरिं । पृच्छसि त्वमिह मां व्यनक्ति न त्वौरवं गुरुषु कोर वोत्तम ॥५२॥ यत्पदोदकमधत्त मूर्द्ध-
नि स्वर्धुनी त्रिजगतीहरो हरः ॥ तं पुराणपुरुषं वमंजसा विद्धि यज्ञपुरुषं च पूजय ॥५३॥ इत्युदा

बा॰भा॰ ११८ रन्निजचिंतनस्फुरीकारवाचिसतिशंतनोःसुते। आद्यमर्घमसुरारयेरयात्पांडवोदितवनेदितस्मयः

118 ॥५४॥ यृज्ञसीम्निशिशुपालपार्थिवस्यज्ञामनहितदर्शनंहरेः। पाटलामितकरालदृगिरंदेहिनी

मिवरुषंततानतत्॥५५॥ सत्वपिडुपदक्रंमसंभवव्यासहृद्गुरुयाज्ञिकेषुकिंपूजितःकुरुपते

हरिस्त्वयानेकमप्यधिततेषुयोगुणं॥५६॥ पूज्यएवयदिवासएषवस्तन्नृपाःकिमुपहूयवंचिताः

।धर्म्मसूनुरितिचात्मनःकृतोनामुनामनिविडंविडंवितं॥५७॥ इत्युदीर्यसममुत्थितोनृपैरेगंत्तु

मिछुरवनीमृत्ताहृतः। वोधितोपिसुचिसावनोक्तिभिर्वाचमित्ययमुवाचकोपनः॥५८॥ नोगति

र्भवतिपुत्रवर्ज्जितेतेननूनमगतिर्हनीजनिः।छेत्तुमेषभवतोपिसद्गतिंवुद्धिदोजनिजनार्हनार्च्च

ने॥५९॥ उज्झवादशकयाद्विमुख्यमिद्धिक्रमस्मितमनास्त्रिविक्रमः।भूयसोपिपरिभूपतीनद्रु राम

तानयमपूजिधित्कया॥६०॥ यःस्त्रियंवतजघानपूतनांन्नूनांकरितपुण्यकदलः।ईदृशि ११८

क्रतुमहोत्सवे महाराजसुकृमयमच्युतोऽर्चितः ॥ ६१ ॥ कैतवादयमजर्जरां जरासंधवंधनविधौ धियं व्य
धात् । तत्कलंकमरमागमागसिंधुत्पइत्युचितमच्युतस्तवः ॥ ६२ ॥ एतदुक्तवति तत्र कोपतस्तद्वधाय
युधि भीमसुच्छ्रितं संनिरुध्य सहसा मुतोरसा शांतनिस्त्रमिति शांतये जगौ ॥ ६३ ॥ प्रागिह त्रिनय
नेचतुर्भुजे जातवत्यसुभरासमध्वनौ । नन्नमातृपितृभीतिपारदा भारतीति गगनोद्भवाभवत् ॥ ६४ ॥
डिंभ एष भविता जगज्जयी मत्सुरस्य सपुनर्भविष्यति । यास्यतोऽधिकहशासमयदुःसंगवशतो
धिकौ भुजै ॥ ६५ ॥ इत्यमुष्य जननी क्रतश्रवा कस्पनैनमकृतां कवर्तिनं । विष्णुमत्तमिव मा
नुमानयं प्राप्य नष्टकरदर्शनो भवान् ॥ ६६ ॥ म्रातृजं निजमथाह साहरिं कापराधमपि मावधी
रमुं । इत्यपादभयदं वरं तदा विष्णुरप्रियशतावधिं सुधीः ॥ ६७ ॥ एनमप्रियशतायुषं ततो विष्णु
यज्ञपशुमत्रमावधीः । इत्यवेत्य शममापमारुतिः कोपमाप्य व जगाद चेदिपः ॥ ६८ ॥ भीष्मभीष्म

बा॰भा॰ तस्तेजसो भृशं भूभुजोवगाणायंतियगुणाःजंङलेशयमपिप्रपूजयन्नूहैङ्करूपधर्मतेर्नवध्यसे॥६
१३९ ९॥ गां निशम्य निशितामितिक्रुधादुर्द्धरोप्यधिजसिद्धसिंधुभूः यत्रपानगणायंतिशार्ङ्गिणांतछि
रस्सुपदामनदर्प्पिनं॥७०॥ पूजितोहरिरयंमयामुनारेन्नृपाःकिमपियस्यदुष्यति। अद्यमङ्क्षुजसु
जंगंभेकतांनिविवकपनिराननोऽत्रसः॥७३॥ इत्युदीर्णगिरिजीर्णपूरुषेरोषकद्दिनमुषेषुराजसु
शार्ङ्गिणंप्रनिजगौजगज्जिदाघोषयोषिदमघोषनंदनः॥७४॥ योग्यतातिगमुपाददेत्वमेनंकिंत्वया
कथममीमिराहितं। वामहःशिशिविमुखेज्जुहोम्यतःकृष्णशांतनवपांडवैःसमा॥७३॥ एहिमंक्षु
मदपूर्णमिहितंसंविधेहियुधिशक्तिरस्तिचेत्तूंमङ्क्षुजोम्बनुचिताहणायहक्रूरपापहरणायते राम
